National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
**NJHSR 2025;** 1(61): 175-177
© 2025 NJHSR
www.sanskritarticle.com

**रश्मिता दलेइ**
साहित्य-विभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**रश्मिता दलेइ**
साहित्य-विभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# सौभाग्यनूपुरं महाकाव्ये दण्डनीतिः विचारः।

**रश्मिता दलेइ**

आचार्यराधावल्लभत्रिपाठीमहोदयः संस्कृतसाहित्यंप्रति प्राच्य तथा पाश्चात्यपरम्परायाः सुविज्ञः मनीषीःआसीत्। तस्य जन्म १५ फरवरी १९४९ तमे वर्षे मध्यप्रदेशस्य राजगढ जिल्लायामभूत्। तस्य पितरौ प.गोकुलप्रसादत्रिपाठी गोकुलवाई श्च आस्ताम्। पिता प.गोकुलप्रसादत्रिपाठी संस्कृत तथा हिन्दी साहित्ययोः मर्मज्ञः विद्वान् कविः समीक्षकश्चासीत्।सः तु बहुनि काव्यानि रचितवन्तः।तेषु सौभाग्यनूपुरं महाकाव्यं अन्यतमः।तत्र ऊनचत्वारिंशः सर्गे दण्डनीति विषये वर्णितमस्ति।

दण्डः इत्युक्तेः किम्?वित्तस्य शरीरस्य वा पिडनम्।दण्डयति इति दण्डः।दण्डप्रयोजनं यथा मनुना कृतम्-

**यदि न प्रणयेद्राजा दण्डं दण्डयेष्वतन्द्रितः**
**शूले मत्स्यानिवापक्ष्यन् दुर्वलान् बलवत्तराः**
**सर्वो दण्डजितो लोके दुर्लभो हि शुचिर्नरः।**
**दण्डस्य हि भयात् सर्वं जगद्भोगाय कल्पते।**

मत्स्येऽपि-

**दण्डप्रणयनं कार्यं लोकानुग्रहकाम्यया।**
**मात्स्यन्यायेन भक्ष्येरन् यदि दण्डं न पापयेत्।**
**दण्डः शास्ति प्रजाः सर्वा दण्ड एवाभिरक्षति।**
**दण्डः सुप्तेषु जागर्ति दण्डं धर्मं विदुर्बुधाः।**
**राजदण्डभयादेव पापाः पापं न कुर्वते।**
**यस्मादृण्डो दमयति अदण्ड्यान् दण्डयत्यपि।**
**दमनादृण्डनाच्चैव तस्मादृण्डं विदुर्बुधाः।**

महाभारते-

**धर्मं संरक्षते दण्डस्तथैवार्थं नराधिप।**
**कामं च रक्षते दण्डस्त्रिवर्गो दण्ड उच्यते।**
**दण्डेन रक्ष्यते धान्यं धनं दण्डोऽभिरक्षति।**
**वाचा दण्डो ब्राह्मणानां क्षत्रियाणां भुजार्पणम्।**
**दानदण्डः स्मृतो वैश्यो निर्दण्डः शूद्र उच्यते।।**

**दण्डस्य उत्पतिः-1**

कविनां मते प्राचीनकाले स्वर्णयुगम् आसीत्। जनाः नैतिकरूपेण व्यवहारं कुर्वन्ति स्म। क्रमेण तेषां जीवने अनैष्ठिकता प्रविष्टा।अत एव विद्वांसः समुदायश्च नियमाः निर्मिताः। ते नियमाः च व्यवहारे आगताः। मनुमते सत्ययुगे धर्मः पूर्णतया चतुष्पदः रुपेण उपस्थितः आसीत्। परन्तु त्रेता, द्वापर, कलियुगे च चोरी, असत्यं च कारणेन धर्मस्य क्रमेण क्षयः अभवत्। बृहस्पतिनारदयोः मते यदा जनाः धार्मिकाः सत्यवादिनः च आसन् तदा तस्मिन् काले न्यायस्य आवश्यकता नासीत्। न च द्वेषः, दुर्भावः च आसीत्।

यदा जनानां मध्ये धर्मस्य क्षयः आरब्धाः तदा धर्मः न्यायः च प्रवर्तते स्म।तस्मिन् समये राजा विवादनिराकरणं न्यायाधीशः च इति घोषितः। अतः शास्त्रानुसारमपेक्षितकार्याय राजा यो धर्मः व्यवस्थापयति नाम नियमं करोति तत् नियमं कोपि न उल्लङ्घनीयः। यथा राजा स्वप्रजानां नियमानुसरणं कर्तुं शक्नोति। तथैव ईश्वरः अपि सर्वेषां प्राणिनां रक्षार्थं धर्मं निर्मितवान्।

याज्ञवल्क्येन धर्मदण्डस्य च एकरूपता अपि प्रस्ताविता।[1] धर्मो हि दण्डरुपेण ब्रह्मणा निर्मितः पुराः। "सर्वः स्वस्वधर्मानुसरणं कुर्वन् एव दण्डस्य पालनं करणीयम्। स्वधर्मव्यवस्थातः न व्यभिचरति।[2] किन्तु देशकालजात्यादिविचार्य एव दण्डः प्रयोक्तव्यः। यदि लोभात् प्रमादात् वा दण्डः प्रयुज्यते। तर्हि केवलं विनाशः।" सर्वत्र दृश्यते ।यदि राजा दण्डप्रयोगे शिथिलः सन् अपराधिनां निरुचिं कृत्वा समुचितं दण्डं न ददाति तर्हि सामाजिकव्यवस्था राज्यव्यवस्था च विक्षिप्ताः भवन्ति।

एतादृशे परिस्थितौ "यस्य यष्टिः तस्य महिषः" इति व्यवस्था " कार्यं आरभते। बलवन्तः दुर्बलान् कण्टकैः भेदयित्वा पीडयितुं आरभन्ते, यथा मत्स्याः लोहशलाकाभिः पच्यन्ते। यदि दण्डः सम्यक् न प्रयुक्तः, कस्यचित् अधिकारः सम्पत्तिः च रक्षितः न भवति तथा च जनानां मध्ये मत्स्यन्यायः सृज्यते, तदा यथा बृहत् मत्स्यः लघुमत्स्यान् खादति, तथैव मनुष्येषु अपि तथैव बलवान् व्यक्तिः दुर्बलस्य क्षतिं करोति।इति दण्डेन एव रक्षितः शक्तिशालिनी भवति इति भाति। अस्य मत्स्यन्यायस्य उल्लेखः रामायणे[3]-महाभारते[4]-कौटिल्य[5]-कमन्दकीयनीतिसारादिषु अपि अस्ति।[6]

**दण्डस्य व्युत्पत्ति- 2**

शुक्रनीति[7]-कामन्दकस्यमते[8] "दण्डः" इति शब्दः "दम्"इति शब्दात् निष्पन्नम्। अर्थात् नियन्त्रणं वा शासनं वा भवति।अस्मात् कारणात् राज्ञः ओन्य नाम दण्डस्य रूपं नाम कठोरं भवति। यतः नियन्त्रणं राज्ञा स्वयमेव करोति।।शुक्रस्य मतेन यत् उपायेन मनुष्यः दुराचारविमोचनं सद्भावं च कर्तुं शक्नोति।समाजस्य प्रयुक्तः तत् दण्डः इति उच्यते। दण्डः द्विविधः ज्ञायन्ते - एकं यत् भविष्ये अपराधानां अप्रियकर्मणां च निवारणं भवति।द्वितीयं च यत् अपराधिनं दण्डयति। अपराधिनं च सम्यक् न्यायं ददाति।अस्य दण्डस्य नियमाः नीतिः इति उच्यन्ते यतः नीतिः अर्थात् "नेतृत्वम्", अर्थात् यत् दण्डं प्रति नेति। मत्स्यपुराणे, अग्निपुराणे, शान्तिपर्वणि च उक्तं यत् “दण्डः” इति नाम अशिष्टजनानाम् दमनं कृत्वा अशोभनानाम् अनैतिकानां च दण्डं ददाति इति कारणतम्।दण्डः शासनं करोति सर्वं च रक्षति।

दण्डभेदः-

**धिग्दण्डस्त्वथ वाग्दण्डो धनदण्डो वधस्तथा।**

**योज्या व्यस्ताः समस्ता वा ह्यपराधवशादिमे।**[9]

धिग्दण्डः धिक्कारः वचनहेतुः, वाग्दण्डः कठोरः शापवचनैः,धनदण्डः तथा वध दण्डः नाम शारिरीकः दण्डः।

**सौभाग्यनूपुरं महाकाव्ये दण्डनीतिः-**

वस्तुतः अस्मिन् सौभाग्यनूपुरं महाकाव्ये दण्डनीतिः कथं रुपेण जातम् तत् बिषये कविः राधावल्लभत्रिपाठी महोदयेन लिखितम्। सर्गेऽस्मिन् यः नायकः तां कथं रूपेण मिथ्यारुपं वचनैः साकं तस्य निर्दोषं कथं रुपेण प्राणदण्डं दत्तवान्।राजा एकः निर्दोषं दण्डं दत्वा कथं रुपेण प्रायश्चितः कृतवान्,तत् बिषये वर्णितमस्ति।सौभाग्यनूपुरं महाकाव्ये यः नायकः सः स्वपत्न्याः सौभाग्यनूपुरं नीत्वा हेमदासः नामकः नाडिन्धमः पार्श्वं गतवान्। सः हेमदासः वञ्चकः आसीत्।पूर्वात् तत्र राणी कुनुप्रियायाः एवं प्रकारेण नूपुरं आसीत्। सा तु तत् नूपुरं मार्जनार्थं हेमदासं दत्तवती स्म।परंन्तु तत् नूपुरं चोरिजातम् पूर्वं घोषितम्।सः एव हेमदासः तत् नूपुरं अत्मसात् कृतम्।यदा कोवलः तत् नूपुरं नीत्वा आगतः। तदा सः चोरः इति हेमदासः-कालीयादयः मिथ्याप्रचारं कृतवन्तः।तत्र राज्ञः अपि उपयुक्तः विचारं न कृत्वा सः निर्दोषः कोवलं फाशीदण्डेन दण्डितः कृतवान्। तदनन्तरं कोवलस्य पत्नी कन्नगी अपरं नूपुरं धारणं कृत्वा तत्र आगताः।तत्र सर्वे ज्ञातवान् यत् कोवलः निर्दोषः।राज्ञः अपि कन्नगीं क्षमायाचनां क्रियते।कन्नगी उवाचः-

**धर्मज्ञः सत्यसन्धस्त्वं त्वं तु नात्रापराध्यसि।**

**अपराद्धाः पुनर्येऽत्र दण्ड्यास्ते स्युर्यथाविधि।।**[10]

त्वं धर्मी सत्यानुयायी असि।तव न दोषोऽस्ति।ते अपराधं कुर्वन्ति तेषां नियमानुसारं दण्डः दातव्यः।

**अस्मिन् पापे नृशंसे तु लिप्ताः सन्ति जनाः परे।**

**दण्ड्यास्ते सर्वथा किन्तु राजा नात्रापराध्यति।।**[11]

अन्ये सर्वे जनाः ये अस्मिन् क्रुरकर्माणि प्रवृताः आसन्,ते दण्डनीयाः,किन्तु राज्ञः दोषः नास्ति।।

**येषां शाठ्याद् दुराचारात् निष्पापः कोवलो हतः।**

**पञ्चैते प्राणदण्डार्हा सर्वे मम मते पुनः।।**[12]

**प्राड्विवाकास्त्विमे विज्ञाः विप्रा ज्ञानविशारदाः।**

**अन्यथा बोधिता एते मिथ्यासाक्ष्यैः कथङ्कथैः।।**

**नैषां किमपि दौरात्म्यमसत्ये निर्णये पुनः।**

**दण्डः पदच्युतिस्त्वेषां मन्येऽलं सर्वथा भवेत्।।**[13]

एतेषां दुराचारात् निष्पापः कोवलः मृतः।एते सर्वे मृत्युः दण्डं प्राप्तुं योग्यः।इतोपि पञ्चः प्राड्विवाक् ये ज्ञानिनः ज्ञानविशारदः श्च आसन्।ते मिथ्यासाक्ष्यैः कोवलं दण्डितः कृतवान् तेषां सर्वेषां पदच्युतिः भविष्यति।तेषां कृते एतत् दण्डः पर्याप्तः भविष्यति।इति राज्ञः अमात्यः उक्तवान्।

**अदण्ड्यः सर्वथा राजा भवतीति त ऊचिरे।**

**धर्मविज्ञा अनूचाना महान्त ऋषयस्तथा।**[14]

वेदवेदांगवित् प्राचीनधर्मशास्त्रज्ञाः ऋषिभिः च वेदेषु उक्तं यत् राजा सर्वदा निर्दोषः अस्ति।

**यदि वा जानता तेनाजानताप्यथवा क्वचित्।**
**अपराधो विधीयेत दण्डनीयोऽप्यसौ भवेत्।।**
**किन्तु दण्डं विधायास्य पाथोनिधौ विसृज्यते**
**अर्धं दण्डं वहेत् राजा वरुणः सागराधिपः।।**
**अर्धोऽशश्चास्य दण्डस्य विप्रैस्ततश्च गृह्यते।।**
**साक्षात् दण्डे प्रदत्ते तु राज्ञेऽराजकता भवेत्।।**[15]

यदि ज्ञात्वा अज्ञाने वा अपराधं कृतवान् तर्हि सः दण्डं दातुं शक्नोति।परंन्तु दण्डस्य विभाजनं कृत्वा तस्य दण्डस्य अर्धं समुद्रे क्षिप्यते।यत् वरुणदेवः सागरस्य स्वामी।अवशिष्टांशः विप्रजनाः धारणं कुर्वन्ति।यदि राजा साक्षात् दण्डं प्रारभते तर्हि अराजकता भविष्यति।

**उपसंहारः-**

अत्र ज्ञायते यत् दोषानुसारेण दण्डविधानं करणीयम्।केन अपराधस्य कृते किं दण्डं दातव्यम्? सम्यक् अपराधं न ज्ञात्वा दण्डः न कर्त्तव्यः। दण्डः सम्यक् प्रमाणाधारितः भवेत्।अत्र राजा सम्यक् ज्ञानं विना सम्यक् प्रमाणं विना एकं निर्दोषं पुरुषं मृत्युदण्डं दत्तवान्।यत् तस्य जनस्य कृते बहुः अन्यायः जातम्।

दण्डव्यवस्थाः-

**क्षात्वाऽपराधं देशं च कालं बलमथापि वा ।**
**वयः कर्म च पित्तं च दण्डं दण्डयेषु पातयेत्।**[16]

अपराधः देश, समयः, शक्तिः, आयुः, कार्याः तथा धनस्य अनुसन्धानं कृत्वा दण्डनीयः व्यक्तिं दण्डः दातव्यम्।

**उपायाः साम दानं च भेदो दण्डस्तथैव च**
**सम्यक्प्रयुक्ताः सिद्ध्येयुर्दण्डस्त्वगतिका गतिः।**[17]

साम प्रियभाषणम्, दानं सुवर्णादिः, भेदो नाम भेदकरणम्, दण्डश्च धनचोरी वध आदि कर्म तेषां समुचितः प्रयोगं देशकालादिनुसारं कुर्वन्तु।यत्र कस्यचित् उपायस्य कार्यं न प्रचलति।तत्र दण्डनीतिः व्यवस्थाः करणीयम्।

**सहायकः ग्रन्थसूची-**

1.राजधर्मविमर्शः, डॉ.जयकृष्णमिश्र प्रथमसंस्करणम् - गणेशचतुर्थी-2003

2.धर्मशास्त्रों में न्यायव्यवस्था का स्वरूप, डा. शशि कश्यप न्यू भारतीय बुक् कार्पोरेशन्, दिल्ली

3.सौभाग्यनूपुरं महाकाव्यम्, राधावल्लभः त्रिपाठी न्यू भारतीय बुक् कार्पोरेशन्, दिल्ली प्रथम संस्करणः 2020

4.याज्ञवल्क्यस्मृतिः

**पाद टिप्पणी:**

[1]याज्ञ.1/34
[2]मनु.7/15
[3]रामायण,2/67/31
[4]शान्तिपर्व,15/30
[5]कौ.अ.प्रथमप्रकरणं,अद्धाय-3,11-12
[6]का.नी.सा.2/4
[7]शुक्रनीति,1.157
[8]कामन्दक,2/15
[9]या.स्मृतिः-367
[10] सो.नू-पृ.685,श्लो.116
[11] तत्रैव.पृ.685,श्लो.129
[12] सौ.नू.पृ-689.श्लो.142
[13] तत्रैव-श्लो143,144
[14] तत्रैव-1श्लो.45
[15] तत्रैव.1श्लो.146.147.148
[16] या.स्मृतिः-368
[17] याज्ञवल्क्यस्मृतिः-346